श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला-२१

# वाक्यार्थज्योतिः

# Vākyārthajyotiḥ

अङ्कः - 3 वर्षम् :- २०१७ - १८

प्रधानसम्पादकः

**प्रो. गोपबन्धुमिश्रः**

कुलपतिः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

**सम्पादकौ**

**डॉ. डी. एम्. मोकरिया, सहायकाचार्यः**

**डॉ. बी. उमामहेश्वरी, सहायिकाचार्या**

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

**श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्**

प्रकाशकः -

डॉ. दशरथजादवः
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवनरोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातम्
दूरभाष : ०२८७६-२४४५३२, फेक्सः २४४४१७
www.sssu.ac.in

सहसम्पादकः समन्वयकश्च -

डॉ. कार्तिकपण्डया
संशोधनाधिकारी
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

© *Shree Somnath Sanskrit University, Veraval - 2020*

Note : The statements and views expressed by the authors of articles in this conference proceeding are their own and not necessarily of the editors. The responsibility of the facts stated opinions expressed, or conclusions reached, is entirely that of the author of respective research articles and that Shree Somnath Sanskrit University accepts no responsibility for them.

| | | |
|---|---|---|
| संस्करणम् | | प्रथमम् |
| वर्षम् | | मार्च २०२० |
| प्रतिकृतय | | ३५० |
| ISBN | - | 978-93-83097-42-5 |
| मूल्यम् | - | रु. १८०/- |

मुद्रकः - जलाराम ग्राफिक्स एन्ड ओफसेट
परमहंस एपार्टमेन्ट के पास,
होटल कावेरी के पीछे, एस.टी.रोड, वेरावल-३६२ २६६
जि. गीर सोमनाथ, गुजरात (भारत)
दूरभाष : (०२८७६) २२१८६१

# विषयानुक्रमणिका


| क्रमः | विषयः | पृष्ठः |
| --- | --- | --- |
| १. | वैदिकस्वराणां वैशिष्ट्यम्<br>प्रो. देवेन्द्रनाथ पाण्डेयः | 1 |
| २. | श्रीमद्भगवद्गीतायां निरूपितानि ज्ञानलक्षणानि<br>डॉ. नरेन्द्रकुमारः एल्. पण्ड्या | 10 |
| ३. | चतुर्दशसूत्र्यां सन्ध्यभावविचारः द्विर्हकारोपात्तविचारश्च<br>प्रो. विनोदकुमार झा | 20 |
| ४. | सम्बन्धप्रियो भवभूतिः<br>प्रो. अर्चना दुबे | 30 |
| ५. | धर्मशास्त्राणुसारेण विवाहप्रथा<br>प्रो. महेन्द्रकुमारः अं दवे | 44 |
| ६. | वैदिकी देवता<br>डॉ. शत्रुघ्न पाणिग्राही | 50 |
| ७. | श्रीमद्भगवद्गीतानुसारेण शान्तिप्राप्त्युपायाः<br>डॉ. पङ्कजकुमार रावलः | 58 |
| ८. | सज्जनचरित्रम्<br>डॉ. डायालालः मोकरिया | 67 |
| ९. | गुरुत्वद्रवत्वयोः वैज्ञानिकं चिन्तनम्<br>डॉ. बी. उमामहेश्वरी | 77 |
| १०. | आत्मनः अखण्डार्थत्वम्<br>डॉ. जानकीशरणः आचार्यः | 83 |
| ११. | હકારાત્મક મનોવલણ<br>ડૉ. જયેશકુમાર ડી. મુંગરા | 96 |
| १२. | Sanskrit E-Resources on Internet<br>Mr. Ravindra Kale | 101 |
| | | |

# वैदिकस्वराणां वैशिष्ट्यम्

प्रो.देवेन्द्रनाथ पाण्डेयः,
वेदसङ्कायाध्यक्षः,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी,
वेरावलम्।

नित्योऽपौरुषेयश्च[1] परमेश्वरस्यनिःश्वासभूतो वेदः जगत्येकामलौकिक्यभिख्यां जनयति सस्वरोच्चारितः सन्। अतिप्राचीनत्वात् प्रकृतिपोषकत्वादार्षत्वाच्चास्य वैदिकसाहित्यस्यास्त्याधिभौतिकम् आधिदैविकमाध्यात्मिकञ्च महत्त्वं विशेषस्वरसंचारकारणादपि। प्रभावश्चास्य वैदिकसाहित्यस्य विश्वसाहित्येषु प्रतीयते तेषां तलस्पर्श्यध्ययनप्रकाशात्। वैदिकस्वराणां भाषा वैज्ञानिकं महत्त्वं आङ्गलादिभाषास्वपि विशेषशब्दवाक्यानामुच्चारणपद्धतौ बलाघातादिषु (stress) सम्यक्तयाऽनुभूयते। "अस्मात्पदादयमर्थोबोद्धव्य"[2] इतीश्वरसङ्केतोऽपि मन्ये वैदिक साहित्यस्य स्वरसंस्कारयोर्निहितोऽनुभूयते ऋग्वेदीय वाक्सूक्तविश्लेषणफलत्वात्।[3] वैदिकसाहित्यस्यार्थनियामकत्वमप्यस्य स्वरप्रपंचस्याघं[4] कर्म प्रमाणीक्रियते पूर्वाचार्यैस्तस्मादत्र वैदिकस्वराणां वैशिष्ट्यं प्रभावश्च सङ्क्षेपरूपेणाधस्तनेषूपशीर्षकेषु परिशील्यते-

➤ स्वरः

"स्वयं राजन्ते इति स्वराः"- अर्थात् स्वराः स्वयमेव प्राकृतिरूपेणो- पस्थिताः भवन्ति व्यञ्जनेषु।[5] एतेनैतज्ज्ञायते यद्व्यञ्जनानामप्युत्पत्तिः स्वरैरेव जायते- वायोः अङ्गविशेषसंघटनजनितत्वात्।[6] परावागस्ति ब्रह्मरूपाऽ-[7] व्यक्तरूपा च मूलचक्रस्थानाभिकमलस्था च भवति, सूक्ष्मतरा अर्धस्पष्टा सामान्यजनानां कृते, हृदयस्था चाधिकस्पष्टा भवन्ती तिष्ठति। अतश्च परम् वैखरीरूपा प्राणवायुसंगता सती

स्थूलरूपा व्यवहार्या च भवति। तत्र च पुनः स्वर एव मूलरूपेण तिष्ठति। तदेव परिवर्त्यते प्राणादिवायुसंयोगात् कण्ठादिसंयोगाच्च। तच्च परिवर्तनमिच्छाशक्त्या, क्रियाशक्त्या च भवति। एतत् सर्वं प्रदर्शयितुमेव वैदिकसाहित्ये, उदात्तादिस्वरसंकेतोहि वैदिकैः प्रदर्श्यते हस्तादिसंचालनेनेति स्वरस्यानिर्वायता वैदिकाध्ययन परम्परायां निर्धारिताऽस्ति। अस्मादेव कारणात् "वाचः" अपि सूचकोऽस्ति स्वरशब्दः :- 'यथा अधिस्वरे' यतोहि उदात्तादिस्वराणां साक्षात् सम्बन्धः प्राणैः प्राणवायुना वाऽस्ति तस्मादस्यापरं नाम प्राण इति। यथा- 'प्राणः स्वरः' तत्रापि विश्लेषणेन प्रतीयते यत्प्राचीनावस्थायामाद्यावस्थायां वा कश्चिदेक एव स्वरोऽभविष्यत्, यस्यावस्थापरिवर्तने नेमे स्वराः विकासमुपगताः।

अस्यापि स्वरशब्दस्य द्वे रूपे भवतः आद्युदात्तस्वरात्मकः, अन्तोदात्तस्वरात्मकश्च। आद्युदात्तस्वरशब्दः वाङ्नामसु[8] पठितः उदात्तदिवाचकश्चान्तोदात्तवाचको मन्यते। परन्त्वत्रापि विद्यते सन्देहः यस्य विश्लेषणं विधीयते श्रीमता युधिष्ठिरमहोदयेन। भवतु नाम यत्किञ्चिद् अत्र तु स्वरस्य सामान्यं स्वरूपमेवोपपाद्यमस्ति, विशेषबुद्धिस्तु शोधमपेक्षते गभीरगवेषणां चेति मम मतिर्भवति। तथैव उपनिषद्-ब्राह्मण-शिक्षादिषु, व्याकरणशास्त्रे प्रातिशाख्येषु चेति च अकारादिवर्णानां कृते स्वरशब्दो हि प्रयुक्तोऽस्ति ध्वनिविज्ञान-विषयाधारेण। एतेषामकारादिस्वराणां पाणिनीयव्याकरणे "अचः" फिट-सिमेति[9] संज्ञापदैः सह प्रातिशाख्यादिषु उल्लेखो दृश्यते, विषयविशेषवर्णनानुरूपपारिभाषिकशब्दनियतत्वात्। एतदतिरिच्य सूर्य-पशु-प्रजापति-वाचकोऽपि स्वरशब्दः[10] वैदिकसाहित्यस्य वैषयिकभाष्यालोकेऽवाप्यते। अर्थावबोधकोऽपि क्वचित् स्वरशब्दः श्रूयते, यथा- "स्वर्यन्तेऽर्था एभिः"। अनेन प्रकारेण स्वरशब्दस्य

प्रवृत्तिनिमित्तानि बहूनि सन्ति, तथाप्यत्र किमपि प्रयोगदिशाऽस्य स्वरस्य वैशिष्ट्यमुपपाद्यते।

➢ छन्दोभिः सह स्वराणां सम्बन्धः --

विशेषरूपेण ऋचां[11] या नियतपादव्यवस्था वर्तते सा नियताक्षर-संस्थिताऽस्ति। तत्रापि तासामृचां शास्त्रपरम्परानुरोधेनोच्चारणं नियतस्वराणामाश्रय एव भवति। अर्थानुरोधेननियताक्षरघटितनियत-पदानामुच्चारणे वैदिकमन्त्रेषु पदानां ये स्वराः तेषां सामूहिकशक्त्याऽपूर्वोत्पत्तिरुपजायते सम्यगुच्चारणेन यत्सौन्दर्यमप्य-लौकिकमेव भवति। अतः छन्दोभिः सहास्य स्वरविज्ञानस्य संवादेन कश्चित्स्पन्दोपजायते येन स्पन्दनेन वातावरणमप्यनुकूलं पर्यावरणमप्यनुकूलं ध्वनिप्रदूषणोच्छेदनञ्च भवतीति मे विश्वासः। शोधोऽत्र विशेषरूपेण यदि भवति तदा सर्वं स्पष्टं भविष्यति। गायत्र्यादिच्छन्दसां वेदे यावन्महत्वं वैदिकपाठसौष्ठवे मन्यते तावदेवमहत्त्वमर्थदृष्ट्याप्यस्तीति साधयति स्वरप्रक्रियैव। अतएवाह वृहद्देवतायां-देवता[12]-ऋषि-छन्दसां वैविध्यं च प्रजायते इति। यथा-

ऋषिसूक्तं तु यावन्ति सूक्तान्येकस्य वै स्तुतिः।
समानच्छन्दसो याः स्युस्तच्छन्दःसूक्तमुच्यते।।
वैविध्यमेव सूक्तानाम् इहविद्याद्यथातथम्॥

तथा चाह नारदः-

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात्॥

उपर्युक्तानां पद्यानां विश्लेषणेनैतदवगम्यते यदस्ति सम्बन्धः छन्दसा स्वराणामिति। विशेषरूपेण वैदिकमन्त्रभाष्यकरणे ऋषि-छन्द-देवता-स्वर- विनियोगादीनामपि महत्त्वं सामूहिकरूपेण विद्यते

इति। स्वराणां छन्दसाञ्चोच्चारणकाले ऋषिमनसोऽभिलापाऽपि "आयाममार्दवाभिघाताङ्गं भूत्वाऽभिव्यज्यते वैखर्य्याम्, यस्याकलनं निरुक्तव्याकरणादिशब्दार्थनिर्वचनप्रतिपादनप्रधानैरङ्गैः विधीयते। एतेषामङ्गानां साहाय्येनैव छन्दसां स्वराणाञ्चाभिप्रायः वैदिकपदविशेषविश्लेषणप्रसंगे विधीयते। तस्मादस्ति पारस्परिको हि सम्बन्धः छन्दोभिः सह स्वराणाम्। 4

➢ विशेषवैदिकपदार्थव्याख्याने स्वराणां भूमिका

वैदिकस्वराणां वैदिकपदार्थावगमने विशेषभूमिका भवतीति सिद्धमस्ति। अस्मादेव कारणात् पाणिनीय व्याकरणशास्त्रेऽपि केचन सामान्य-वैदिक-स्वरनियमाः केचन पुनः विशेषस्वरनियमाः पाणिनीयसूत्रेषु निर्दिष्टाः सन्ति यथा - अनुदात्तं पदमेकवर्जम् इत्यतः प्रारभ्य उदात्तस्वरितपरस्य सन्नतरः इति सूत्रं यावत् वैदिकपदेषु सामान्यस्वरविधानं भवतीति प्रतिपादितम्। अतश्च परम् धातोः इत्यतः तिङि चोदात्तवति इति सूत्रं यावत् विशेषव्याकरणप्रकिया सन्दर्भे स्वरनियमाः प्रोक्ताः सिद्धान्तकौमुद्याम्। तदतिरिच्य प्रतिवेदं कतिचित्पदानि विशिष्टस्वरोपेतानि पदानि विशिष्टार्थानि भवन्तीति प्रातिशाख्यग्रन्थानामवलोकनेनावगम्यते। यथा- 'ऋग्वेदप्रातिशाख्ये एकाक्षरसमा-वेशे पूर्वयोः स्वरितः स्वरः-स्वरपटलम्-३ उदा. तेऽवर्धन्तु इत्यादि। तथा च जात्यद्वा तथावान्तौ तनू शचीति पूर्वयोः- उदा. तनूनपादुच्यते गर्भ आसुरः – इत्यादि।

शुक्लयजुर्वेदीयप्रातिशाख्ये यथा- मन्ये पदपूर्वं सर्वत्र – २/१५ अर्थात् मन्ये इत्येतत् पदम् अनुदात्तम् भवति सर्वत्र पूर्वपद युक्तम्। अर्थात् मन्ये इत्येतत् पदम् अनुदात्तम् भवति सर्वत्र पूर्वपदयुक्तम्। मा च (२/४) अर्थात् शुक्ल यजुर्वेदे मा पदमपि अनुदात्तम् भवति। तथैव त्वा च (२/६) असि (२/८) गिर्वणः(२/१०) कृष्णो मृगसंयोगे २/२५- अर्थात् कृष्ण शब्दस्य मृगः कृष्णवर्णश्चेति द्वावप्यर्थौ भवतः। परन्तु आद्युदात्तपदम् "कृष्णः" इति, मृगवाचकं भवति।

पं. युधिष्ठिरमीमांसकमहोदयः स्वकीयवैदिकस्वरमीमांसायाम् स्वरविशेषदर्शनादर्थविशेषप्रदायकान् शब्दान् कतिपयान् प्रदर्शितवान् अस्ति यथा- यमः (स्वरितान्तः) गम्यते येनेति भावं सूचयति परन्तु तदेव पदमाद्युदात्तं यदा भवति तदा तस्यार्थो भवति वैवस्वत इति।[14] तैत्तिरीय प्रातिशाख्ये यथा- "नोदात्तस्वरितपरः" अर्थात् उदात्तपरस्य स्वरितपरस्य च अनुदात्तस्य प्रचयस्वरो नेष्यते। उदा. इमं मे वरुण श्रुधिहवम्...। अथर्ववेदप्रातिशाख्ये यथा- स्वरितादनुदात्त उदात्तश्रुतिः- ३/२७ उदा. देवीर्द्वारो बृहतीर्विश्वमिन्वाः- इत्यत्र स्वरितस्वरात् परः एकोऽनेको वा अनुदात्तः उदात्तश्रुतिः भवतीति- निर्मलभाष्यानुरोधेन प्रचयो हि स्वरो जात इति।

अनेन प्रकारेण वैदिकमन्त्रव्याख्याने स्वराणामुदात्तानुदात्त-स्वरितानां तत्प्रभेदानां प्रचयादीनां, षड्जादीनाञ्च महद् योगदानं शास्त्रकारैः साधितमस्ति।

➢ **अन्यभाषासाहित्येप्रभावः स्वराणाम्**

भाषायाः समुत्पत्तिः, ध्वनिविज्ञानम् अर्थविज्ञानञ्चेति भाषा-वैज्ञानिकानां प्रतिपाद्यविषयेष्वन्यतमाः विषयाः मन्यन्ते। तैत्तिरीय-

वाजसनेयादिप्रातिशाख्यानां पाणिनीय व्याकरणस्य निरुक्त शास्त्रस्य, वाक्यपदीयस्य चाध्ययनेन सामान्यरूपेण ध्वनिरेव (सुपुसः) विशेष- प्रक्रियामाश्रित्याक्षरवर्णपदादिरूपेण परिणमति व्यवहारप्रसङ्गे। तदेवास्ति प्रायशोऽभिप्रायः भाषाविज्ञानक्षेत्रे पाश्चात्यविदुषामपि स्वल्पवैभिन्येन सह। यदा प्रकृतिरेकाऽस्ति, चैतन्यमेकमस्ति, मानवशरीरसंरचनाप्यभिन्नास्तीति तदा मानवानां व्यवहारप्रवृत्ति- रप्येकैवभवतीति सिद्धम्। अस्मादेव कारणात् विश्वस्मिन् मानवशरीररचनाविषये चिकित्साक्षेत्रे च वैज्ञानिकानां सामान्यी- करणप्रवृत्तिरवलोक्यते। तस्मादेतत्सिद्ध्यति सुतरामेव यन्मनो- भावोऽपि जगतो जनानां समान एव। उच्चारणप्रक्रिया उच्चारणस्थानानि बलाघातविशेषविधिश्च समान एव। अतः यथा वैदिक साहित्ये बलाघातः[15] स्वरसंकेतेन स्वरसंचारेणोच्चारणेन चोपस्थाप्यते तथैवान्यत्रापि भाषा-साहित्येऽव-लोक्यते।

(oxford dictionary) ओक्सफोर्ड-शब्दकोशे[16] शब्दानामुपरि वैदिकस्वरवदेव किमपि चिह्नं प्राप्यते, तेषां समुचितरूपेणोच्चारण-कारणात्। एतदेव बलाघातः (stress) इत्युच्यते। तदनुरोधेनोच्चारणा-देवाभीष्टोह्यर्थोऽधिगन्तुं शक्यते, सम्यक् संप्रेषणञ्च। एतत् सर्वं वैदिकस्वरमीमांसायाः स्वरविज्ञानस्यैव प्रतिफलमस्ति। वेदे हस्त-मुख-संवादा[17]वस्थायामेवोदात्तादीनामुच्चारणेनाध्ययनफलं यज्ञफलञ्चोपात्तं भवतीति कल्पितम्। तद्वदेव ग्रीकादि उपजीव्यभाषाप्रसृतासु भाषास्वपि भवतीति मन्ये। अस्मादेव कारणात् भाषाप्रयोगशालानामपि स्थापनं तु शिक्षणसंस्थास्ववलोक्यते। लौकिकसाहित्यसंदोहे माध्यमेनैव विशिष्टच्छन्दसामवधिगतपदसमवायस्थापन-वैदिकस्वराणां मर्यादापालनं भवतीति व्याहरणे नातिशयोक्तिः।

एतेषां सर्वेषां प्रातिशाख्यब्राह्मणग्रंथादीनां परिज्ञानाश्रयेणाचार्यः पाणिनिः स्वराणामुदात्तादीनां विशदं विश्लेषणं चकार, यत् प्रवर्तते सर्वभाषासाहित्ये। अस्मात् कारणादेव पाश्चात्यभाषावैज्ञानिकाः संस्कृतभाषासाहित्यं सम्यगधीत्य विश्वस्मिन् प्रसारमुपगतानां भाषाणां संस्कृतभाषया सह तुलनात्मकमध्ययनं विधायैकं भाषाविज्ञानम् आधुनिकं क्षेत्रमुद्भावितवन्तः सन्ति। विस्तारभयादत्रैवैतत् उपसंहरामि।

## सन्दर्भसूची

(१) यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।

निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥ आचार्य सायण-वै.सा.का इति. पृ.५, मुसलगांवकरजी प्रकाशन चौखम्भा संस्कृत संस्थान-१९९४।

(२) द्र. शब्दपरिच्छेदः- तर्कसंग्रहः (अन्नं भट्टस्य) व्यासप्रकाशनम्-डी. १६।१३, मानमन्दिर, वाराणसी (श्रीकृष्णवल्लभाचार्य)।

(३) वाक्सूक्त-ऋग्वेद-१०।१२५ (१०-१२५-३) द्र.वै.सूक्तसंग्रह प्रकाशन-जगदीशसंस्कृतपुस्तकालय-जयपुर-२००६।

(४) अन्धकारे दीपिकाभिर्गच्छन्न स्खलतिक्वचित्। एवं स्वरैः प्रणीतानां भवन्त्यर्थाः स्फुटाः इति वेंकटमाधव, द्र. वैदिकस्वरमीमांसा-युधिष्ठिरमीमांसकः, प्रकाशनभारतीय प्राच्यविद्याप्रतिष्ठानम्-३१/१४४, अलवरगेटः अजमेर-वैशाखीपूर्णिमा-संवत्-२०४२।

(५) पतञ्जली ने यह शंका की है कि यह स्वराघात उदात्तत्वादि व्यञ्जनात्मकता दों में भी दीखता है, "इषे त्वोर्जे त्वा" आदि में। इसका उत्तर दिया है कि नैते व्यञ्जनस्य गुणाः किन्त्वच्च एव। तत्सामीप्यात्तुव्यञ्जनमपि तद्गुणमुपलभ्यते। अष्टाध्यायी-सू. १।२।२९।

"some phoneticians have expressed the view that stress is not independent of pitch and have shown by experiments with a dead larynx that an increase of stress involves a rising of pitch-

द्र. भाषाविज्ञान की भारतीय परम्परा और पाणिनि, डो. रामदेव त्रिपाठी- पृ. ३०८–प्रका. बिहारराष्ट्रभाषापरिषद् पटना-१९७७।

(६) द्र. तैत्तिरीय-प्रातिशाख्य (डो. जमुनापाठक) चौ.सं.सीरीज-२००७। अक्षरव्यञ्जनानामनुपलब्धिर्ध्वानः – २३/७।

अनुप्रदानात् संसर्गात् स्थानात्करणविन्ययात्।

जायते वर्णवैशेष्यं परिमाणाच्च पञ्चमात्॥ २३/२।

(७) परापाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।

हृदिस्था मध्यमा गेया वैखरी कण्ठदेशगा॥

स्फोटविचारः परं ल.मंजूषा द्र. भाषावि.की भाष्यपरम्परा और पाणिनि डो. रामदेव त्रिपाठी- पृ.२२/३२। परापूर्ण शब्दब्रह्म, निरुपाधि, पश्यन्ती-प्रतिभा, क्रियाप्रधान, द्युलोक, मित्रसदन, सूर्य। मध्यमा-बुद्धि, ज्ञानप्रधान, अन्तरिक्ष, वरुणसदन, विद्युत्। वैखरी-मन,इच्छाप्रधान,पृथ्वी.अग्निसदन,तेज। डो. रामदेव त्रिपाठी।

(८) द्र. वैदिकस्वरमीमांसा-पं.यु.मीमांसक-पृ.५।

(९) सिमादिष्टौ स्वराणाम्- सन्ध्यक्षरं परम्- ट्र. वाजस.प्रातिशाख्यम् १।४४-४५-प्रो..वीरेन्द्रकु.वर्मा पटनीटोला-वाराणसी। (१९७५)।

(१०) द्र.वै.स्वरमीमांसा।

(११) तेषामृक् यत्रार्थवशेन पादव्यवस्था-२-१३५-१० जै.न्या.माला।

(१२) अविदित्वा ऋषिं छन्दो दैवतं योगमेव च। योऽध्यापयेज्जपेद्वापि पापीयाञ्जायते तु सः॥ ऋषिच्छन्दोदैवतानि ब्राह्मणार्थं स्वरादपि। अविदित्वा प्रयुञ्जानो मन्त्रकण्टक उच्यते॥

स्वरोवर्णोऽक्षरं मात्रा विनियोगोऽर्थमेव च। मन्त्रं जिज्ञासमानेन वेदितव्यं पदे-पदे॥

द्र. The new vedic selection - part 1st- by- prof. B.B.chaube. page-one.

(1) publication- bhartiya vidya prakashan- varanasi- 1972.

(१३) वाजस. प्रातिशाख्य- १/३१।

(१४) द्र. वैदिकस्वरमीमांसा- अध्याय- २ (पं.यु.मीमांसक)।

(१५) द्र.भा.वि.की.भा. पर.- डो.रामदेव त्रिपाठी. पृ.२९८।

(१६) see page–170, oxford advanced learner's dictionary.

(१७) सममुच्चारयेद्वर्णान् हस्तेन च मुखेन च। स्वरश्चैव तु हस्तश्च द्वावेतौ युगपत्स्थितौ॥ या.शि-२५॥ द्र. वाजसनेय प्रातिशाख्य; एकपरिशीलन – पृ. ३४४।

प्रो. युगलकिशोरमिश्र, प्र.सम्पूर्णानन्द.सं.वि.वि, वाराणसी- १९९७।